वापि विपाचितम् । मुखरोगहरं ज्ञेयं जिह्वारोगेषु सैन्धवम् । शृङ्गवेरं हरिद्रे द्वे त्रिफला च गलग्रहे । हृच्छूले वस्तिशूले च वातरोगक्षये तथा । त्रिफला घृतमिश्रा च गवां पाने प्रशस्यते । अतीसारे हरिद्रे द्वे पाठाञ्चैव प्रदापयेत् । सर्वेषु कोष्ठरोगेषु तथा शाखागतेषु च । शृङ्गवेरञ्च भार्गीं च कासश्वासे च दापयेत् । दातव्या भग्नसन्धाने प्रियङ्गुर्लवणान्विता । तैलं वातहरं पित्ते मधुयष्टिविपाचितम् । कफे व्योषञ्च समधु संपिष्टकरजोऽब्जजे । तैलाज्यं हरितालञ्च भग्नक्षतघृतं ददेत् । माषास्तिलाः सगोधूमाः पशुक्षीरं घृतन्तथा । एषां पिण्डी सलवणा वत्सानां पुष्टिदा त्वियम् । बलप्रदा वृषाणां स्यात् ग्रहनाशाय धूपकः । देवदारुवचामांसीहिङ्गुगुग्गुल सर्षपाः । ग्रहादिगदनाशाय एष धूपोगवां हितः । घण्टा चैव गवां कार्या धूपेनानेन धूपिता । अश्वगन्धातिलैः शुक्लैस्तेन गौः क्षीरिणी भवेत्'' । इति गवायुर्वेदः

अथ वृक्षायुर्वेदस्तत्रैव ''वृक्षायुर्वेदमाख्यास्ये प्लक्षश्चोत्तरतः शुभः । प्राग्वटोयाम्यतश्चाम्र आप्ये ऽश्वत्थः क्रमेण तु । दक्षिणादिशसुत्पन्नाः समीपे कण्टकिद्रुमाः । उद्यानं गृहवामे स्यात्तिलानयथ पुष्पितान्'' इत्युपक्रम्य ''अरिष्टाशोकपुन्नागाः शिरीषाः सप्रियङ्गवः । अशोककदलीजम्बुस्तथा बकुलदाड़िमाः । सायं प्रातस्तु घर्मान्ते शीतकाले दिनान्तरे । वर्षरात्रौ तु भुवः शोषे सेक्तव्या रोपिताद्रुमाः । उत्तमं विंशतिर्हस्ता मध्यमं षोडशान्तरम् । स्थानात् स्थानान्तरं कार्यं वृक्षाणां द्वादशान्तरम् । विफलाः स्युर्घनाद्वृक्षाः शस्त्रेणादौ हि शोधनम् । विडङ्गघृतपङ्काक्तान् सेचयेच्छीतवारिणा । फलनाशे कुलत्थैश्च माषैर्मुद्गैर्यवैस्तिलैः । घृतशीतपयःसेकः फलपुष्पाय सर्व्वदा । आविकाजशकृच्चूर्णं यवचूर्णं तिलानि च । गोमांसमुदकञ्चेति सप्तरात्रं निधापयेत् । तत्सेकः सर्ववृक्षाणां फलपुष्पादिवृद्धिदः । मत्स्याम्भसाऽवसेकेन वृद्धिर्भवति शाखिनः । विडङ्गतण्डुलोपेतं मत्स्यं मांसं हि दोहदम् । सर्वेषामविशेषेण वृक्षाणां रोगमर्द्दनम्'' । वृहत्संहितोक्तो वृक्षायुर्वेद आरामशब्दे दृश्यः । आयुर्वेदमधीते वेद वा उक्था० ठक् । आयुर्वैदिकः आयुर्वेदाभिज्ञे त्रि० । आयुर्वेदे साधु कथा० ठक् । आयुर्वैदिकः आयुर्वेदे साधौ त्रि० । [न्तरौ ।

**आयुर्वेदमय** पु० आयुर्वेदेन प्रचुरः प्राचुर्ये मयट् । धन्व-

**आयुर्वेदिन्** त्रि० आयुर्वेदोवेद्यतया विद्यतेऽस्य इनि । आयुर्वेदाभिज्ञे चिकित्साशास्त्रस्य वेत्तरि वैद्ये ।

**आयुषज्** त्रि० आयुना सजते सन्ज–क्विप् षत्वम् । आयुः सम्बन्धे ''सोमः पवत आयुषक्'' ऋ०९,२५,५ । ''पवस्व देवायुषगिन्द्रं गच्छतु ते मदः'' ऋ०९,६३,२२ ।

**आयुष्क** पु० आयुषा कायति कै–क । आयुषा प्रकाशमाने प्रशस्तायुष्के ।

**आयुष्काम** त्रि० आयुः कामयते काम–णिङ्–अण् उप०स० । आयुरभिलाषुके ''अथात आयुष्कामीयं रसायनम्'' इति सुश्रुतः । ''आयुष्कामेण वप्तव्यं न जातु परयोषिति'' मनुः ।

**आयुष्कृत्** त्रि० आयुः करोति कृ–क्विप् ६त० । आयुर्वृद्धिकरे रसरसायनादौ आयुर्वृद्धिशब्दे ७७५पृष्ठे तान्युक्तानि । ट । आयुष्कर इत्यप्यत्र त्रि० स्त्रियां ङीप् ।

**आयुष्टोम** पु० आयुः साधनं स्तोमः शाक०त० षत्वम् । १आयुःसाधने ऋक्समुदायात्मके स्तोमभेदे २तत्स्तोमयुक्तेयागभेदे च ।

**आयुष्मत्** त्रि० आयुर्विद्यतेऽस्य मतुप् । १चिरजीविनि ''आयुष्मान् भव सौम्येति वाच्यो विप्रोऽभिवादने'' ''आयुष्मन्तं सुतं सूते यशोमेधासमन्वितम्'' मनुः स्त्रियां ङीप् । २विष्कम्भावधिके तृतीये योगे पु० । ''विष्कम्भः प्रीतिरायुष्मान्'' ज्यो०त० । आयुरिति शब्दोऽस्त्यस्य मतुप् । ३आयुःशब्दयुक्ते मन्त्रभेदे ''आयुष्मानिति शान्त्यर्थं जपित्वाचैव समाहितः'' छ०प० । तच्च आयुष्यसूक्तशब्दे दृश्यम् । भवदादिषु पाठात् तस्मिन् परे प्रथमार्थेऽपि तसिलादि । ततआयुष्मान् तत्रायुष्मान् ।

**आयुष्य** त्रि० आयुः प्रयोजनमस्य ''स्वर्गादिभ्यो यत्'' पा०भा० यत् । आयुःसाधने आयुर्वृद्धिशब्दोक्ते रसरसायनद्रव्यकर्म्मादौ । ''आयुष्यं प्राङ्मुखोभुङ्क्ते ऋतं भुङ्क्ते ह्युदङ्मुखः'' ''इदं यशस्यमायुष्यमिदं निःश्रेयसं परम्'' ''धन्यं यशस्यमायुष्यं स्वर्ग्यञ्चातिथिपूजनम्'' इति च मनुः ''आयुष्योह्वा अस्यैष आत्मनिष्क्रयणो भवति'' शत०ब्रा० ।

**आयुष्यसूक्त** न० कर्म्मधा० । ''आयुष्मानिति शान्त्यर्थं जप्त्वा तत्र समाहितः'' छ०प० उक्ते ''आभ्युदयिकश्राद्धादिषु जप्ये सूक्तभेदे तच्च सूक्तम् । ''आयुर्विश्वायुर्विश्वमायुरशीमहि । प्रजात्वष्टधार निधेह्यस्मे शतं जीवेम शरदो वयन्ते । आयुषे पवस्व वर्च्चसे मे पवस्व विद्भः पृथिव्या दिवोजनित्राः शृण्वन्त्वापोऽध्यक्षरन्ती सोमोहोद्गाय ममायुषे मम ब्रह्मवर्चसाय यजमानस्यार्थ्यो अमुष्य राज्याय'' भव-